# Shrikrishnakritam Shiva Stotram

# श्रीकृष्णकृतं शिवस्तोत्रम्

## Document Information

Text title : Shrikrishnakritam Shiva Stotram

File name : kRRiShNakRRitaMshivastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe pUrvabhAge 24/60-77

Latest update : August 13, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 13, 2022

*sanskritdocuments.org*

# श्रीकृष्णकृतं शिवस्तोत्रम्

श्रीकृष्ण उवाच ।
नमोऽस्तु ते शाश्वत सर्वयोने
ब्रह्माधिपं त्वामृषयो वदन्ति ।
तपश्च सत्त्वं च रजस्तमश्च
त्वामेव सर्वं प्रवदन्ति सन्तः ॥ १॥

त्वं ब्रह्मा हरिरथ विश्वयोनि-
रग्निः संहर्त्ता दिनकरमण्डलाधिवासः ।
प्राणस्त्वं हुतवहवासवादिभेद-
स्त्वामेकं शरणमुपैमि देवमीशम् ॥ २॥

साङ्ख्यास्त्वामगुणमथाहुरेकरूपं
योगस्थं सततमुपासते हृदिस्थम् ।
वेदास्त्वामभिदधतीह रुद्रमग्निं
त्वामेकं शरणमुपैमि देवमीशम् ॥ ३॥

त्वत्पादे कुसुममथापि पत्रमेकं
दत्त्वासौ भवति विमुक्तविश्वबन्धः ।
सर्वाघं प्रणुदति सिद्धयोगिजुष्टं
स्मृत्वा ते पदयुगलं भवत्प्रसादात् ॥ ४॥

यस्याशेषविभागहीनममलं हृद्यन्तरावस्थितं
ते त्वां योनिमनन्तमेकमचलं सत्यं परं सर्वगम् ।
स्थानं प्राहुरनादिमध्यनिधनं यस्मादिदं जायते
नित्यं त्वाहमुपैमि सत्यविभवं विश्वेश्वरं तं शिवम् ॥ ५॥

ॐ नमो नीलकण्ठाय त्रिनेत्राय च रंहसे ।
महादेवाय ते नित्यमीशानाय नमो नमः ॥ ६॥

नमः पिनाकिने तुभ्यं नमो मुण्डाय दण्डिने ।
नमस्ते वज्रहस्ताय दिग्वस्त्राय कपर्दिने ॥ ७॥

नमो भैरवनादाय कालरूपाय दंष्ट्रिणे ।
नागयज्ञोपवीताय नमस्ते वह्निरेतसे ॥ ८॥

नमोऽस्तु ते गिरीशाय स्वाहाकाराय ते नमः ।
नमो मुक्ताट्टहासाय भीमाय च नमो नमः ॥ ९॥

नमस्ते कामनाशाय नमः कालप्रमाथिने ।
नमो भैरववेषाय हराय च निषङ्गिणे ॥ १०॥

नमोऽस्तु ते त्र्यम्बकाय नमस्ते कृत्तिवाससे ।
नमोऽम्बिकाधिपतये पशूनां पतये नमः ॥ ११॥

नमस्ते व्योमरूपाय व्योमाधिपतये नमः ।
नरनारीशरीराय साङ्ख्ययोगप्रवर्त्तिने ॥ १२॥

नमो भैरवनाथाय देवानुगतलिङ्गिने ।
कुमारगुरवे तुभ्यं देवदेवाय ते नमः ॥ १३॥

नमो यज्ञाधिपतये नमस्ते ब्रह्मचारिणे ।
मृगव्याधाय महते ब्रह्माधिपतये नमः ॥ १४॥

नमो हंसाय विश्वाय मोहनाय नमो नमः ।
योगिने योगगम्याय योगमायाय ते नमः ॥ १५॥

नमस्ते प्राणपालाय घण्टानादप्रियाय च ।
कपालिने नमस्तुभ्यं ज्योतिषां पतये नमः ॥ १६॥

नमो नमो नमस्तुभ्यं भूय एव नमो नमः ।
मह्यं सर्वात्मना कामान् प्रयच्छ परमेश्वर ॥ १७॥

सूत उवाच ।
एवं हि भक्त्या देवेशमभिष्टूय स माधवः ।
पपात पादयोर्विप्रा देवदेव्योः स दण्डवत् ॥ १८॥

इति कूर्मपुराणे पूर्वभागे चत्वारिंशाध्यायान्तर्गतं
श्रीकृष्णकृतं शिवस्तोत्रं समाप्तम् ।
कूर्मपुराणे पूर्वभागे २४/६०-७७

Proofread by PSA Easwaran

*Shrikrishnakritam Shiva Stotram*

pdf was typeset on August 13, 2022

Please send corrections to *sanskrit@cheerful.com*